International Journal of Sanskrit Research 2015; 1(2): 103-107

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(2): 103-107
© 2015 IJSR
www.anantaajournal.com
Received: 27-11-2014
Accepted: 29-12-2014

**जयकान्तसिंहशर्मा**
प्रोफेसर, श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्, कटवारिया सराय, नई दिल्ली, भारत

Corresponding Author:
**जयकान्तसिंहशर्मा**
प्रोफेसर, श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्, कटवारिया सराय, नई दिल्ली, भारत

# चादिनिपातप्रयोगसौष्ठवपर्यालोचना

## जयकान्तसिंहशर्मा

### सारांश
स्वमनोगतभावस्य सम्प्रेषणाय अन्येषु अभिव्यक्तये भाषोपादीयते मानवैरिति सर्वप्रत्यक्षम्। येषां पदानां प्रयोगेण सहजतया अविलम्बेन च अभिव्यक्तिमनुभवति मानवः, तानि तानि पदानि अचिरेण बुद्धौ तस्य यथासंस्कारं समायान्ति, सद्यस्तन्मुखान्निःसरन्ति च। एवं हि दृश्यते लेखनादौ तु विचार्य पदोपादानं, किन्तु आवेशादौ यदा मानवोऽविचार्यैव पदान्युपादत्ते, तदा शब्दानां तारतम्यपरीक्षणं विनैव निसर्गतया यथाभ्यासं यथासौकर्यं प्रयुङ्क्त एव। भाषा तु यथाभ्यासं परिवर्तते।

**कूटशब्दः** भाषोपादीयते, बुद्धौ, बलाभदवाहेयतया, भनश्चयः

### प्रस्तावना
### विवेचनम्
इदं प्रसिद्धमेव यन्नामाख्यातोपसर्गनिपातरूपाणि चतुर्विधान्यपि पदानि प्रणयन्ति अन्वित्य यथायथं लेखने सततमभियुक्ता जनाः। एतेषु निपाता अपि अव्ययव्यतिरेकाभ्यां प्रथितमहिमानो बलादिवाहेयतया समवतरन्त्येव। निपातानां समाकलने प्रथमं सौकर्यन्तु इदमेव, यत्तदुपादाने विभक्तियोजनविचारो न करणीयो भवति, यथास्वरूपमविकलं त उपतिष्ठन्ते। बहूनां निपातानां कोऽपि विकल्पोऽपि नास्ति, येन तत्स्थाने निपातातिरिक्तं किमप्यन्यत्पदमुपादीयेत, यथा - च, न, एव इति। एतेषां प्रयोगं विना एतदर्थः कथम्प्रकाश्येत इति। भाषाविद्भिः साक्षादनुभूयते। अभिप्रायप्रकाशनावसरे बहवोऽपेक्षिता भावा नैतान् विना यथायथं प्रकाश्यन्ते, तद्यथा यदा निश्चयः, निषेधः, प्रश्नः, हर्षः, विषादो जुगुप्सासम्भ्रमः प्रसिद्धिर्वा प्रकाशनीयः स्यात्तदा कथङ्कारं वाक्येन पदान्तरेण वा निर्वाहः स्यादिति विद्वांसः स्वयमनुभवन्ति। अतस्तत्र तत्रावधारणसमुच्चयविशेषनिषेधाश्चर्यादिभावानामभिव्यक्तये ते नूनं प्रयुज्यन्ते। कदाचिदेषामावृत्तिर्दृश्यते कदाचिन्निश्चितार्थाद् भिन्नार्थे प्रयोगः। यथा - न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् [1] इत्यत्र सम्भ्रमादावृत्तिः। एवमेव भोः भोः, मा मा, धिक् धिक्, भूयो भूय इति। कदाचित् त्वर्थे चकारः, एवार्थे चकार इत्यादिकमपि टीकाकृद्भिरनुसन्धाय निर्धार्यते। स्वाभिसन्धिद्योतनाय 'अपि' पदम् एवपदं वा कियदुपकारकमित्यनुभवसिद्धमेव मनीषिणाम्। कठिनतरविषयाणां निरूपणप्रसङ्गे टीकाकृतां ग्रन्थकाराणां वायमभ्यास एव, यत्ते ननु-नच इति चेत्-न इतिनिपातप्रयोगप्रसिद्धशैल्या स्वनिरूपणविधाने लाघवमनुभवन्ति औचितीञ्च। बोद्धारोऽपि इमां शैलीं सम्यग् विज्ञाय सम्पद्येव तदभिसन्धिं परिचिन्वन्ति।

अत एव लोकेऽपि विमृश्यकारिणं प्रति एवमुच्यते, अयमधिकं ननु-नच करोतीति। न्यायशैल्या यदा कस्यापि लक्षणस्य विषयस्य वावधारणं करणीयं भवति तदा अस्याः परिष्कारशैल्याः प्रयोगोऽद्यापि समाद्रियते। देशकालादिबोधनायापि तस्मिन् देशे, तस्मिन् काले इति वा कथनापेक्षया तत्र-तदा इति कथने सौकर्यमनुभवन्ति जना लाघवञ्च। तत्र-तदा, इतस्ततः-यतः-इत्थं कथमित्यादीनि पदानि प्राग्दिशीयप्रकरणे तद्धितैः निष्पाद्यन्त इति तद्धितश्चासर्वविभक्तिरिति[2] अनुशासने-नैषामव्ययनिपाततां जानन्त्येव विद्वांसः। अर्थान्तरन्यासालङ्कारे सादृश्यमूलकालङ्कारेषु च भूम्ना यतो हिर्वा, इव यथा, वत् इत्यादिकं वा प्रायः प्रयुज्यत एव। एतेषां प्रयोगेण स्वतः अलङ्कारः स्फुटं प्रतीयते, प्रयोगं विना विमर्शमपेक्षत इत्यपि अनुभवसिद्धमेव। 'न वेति विभाषा'3 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[4] इत्यादिसूत्रेषु इतिपदोपादानं विना प्रसक्तो दोषो विचारित एव ग्रन्थेषु। यदा चानुपूर्वीशब्दस्वरूपं ग्राह्यं भवति, तदा इतिप्रयोगं विना नान्यत्किमपि शरणम्। यथा गवित्ययमाह, तवास्मीति च याचते इत्यादिषु अनुवादवाक्येषु स्पष्टप्रतीतये तदुपादानमेवोपायः। एवमिदमायातं यन्निपातानां प्रयोगं विना स्वाभिप्रायप्रकाशनमशक्यमिव जायतेऽतो भाषायां यथावश्यकतं तेषामवतरणमानिवार्यं भवति। किञ्च काव्ये निपातानां यथास्थानं प्रयोगेणापि काप्यभिख्या समुल्लसति। जघान कंसं किल वासुदेव[5] इत्यत्र किलशब्देन यथा सम्पद्यते वाक्यं न तथेति श्रूयत इत्यादिना वाक्यखण्डेन। मृतो नाम भूत्वेत्यत्र नामशब्देन यदाभिरूपकमापाद्यते वाक्यस्य, नतन्मृत इति व्यपदिश्येत्यवमुपन्यासेन। लाघवमपि निपातप्रयोगकृतं बह्वादरणीयं भवति। सति निपातप्रयोगे वाक्यमेकं भवति असति चानेकमिति लाघवं परिस्फुटमेव। अल्पाः शब्दखण्डा अमी उच्चावचेष्वर्थेषु निपतन्तीति बहूपकुर्वन्ति सन्दर्भस्य। क्वचिदनर्थका अपि वाक्यभूषाणां शिष्टैः समाद्रियते, तद्यथा - क इदानीमुष्णोदकेन नवमालिकां सिञ्चतीति। भवान् विद्वानित्याहूयते इति वाक्येन इतिना हेतुः प्रकाश्यते, अत्र कियता लाघवेन इतिमात्रप्रयोगेण हेत्वर्थ उन्नीयत इति निपातकृतं सौष्ठवमपि नापलपितुं शक्यम्।

इत्थं निपातानां प्रयोगेण क्वचिदपि विवक्षितं न व्यभिचर्यते, यथेष्टं तात्पर्यं प्रकाशयितुं वयमलं भवामः। अतो भाषायां निपाताः स्वयमवतरन्ति, कृतस्तद्धितास्तु अभ्यासवशाद् व्यतिरेकेणोपतिष्ठन्ते, निपातास्तु न तथा। तथाहि - कश्चित् पूजां करोति कश्चित्पूजयति इति प्रयुङ्क्ते, एवं क्वचित्तिङन्तादरः, क्वचिच्च कृदन्तादरः स्फुटं प्रतीयते। एवं 'कश्चिद् दशरथस्य पुत्रः' इति कश्चिच्च 'दाशरथिः' इति प्रयोगं कुरुते, तथा 'भवतो नाम किम्' इत्यत्र प्रयुक्तस्य किमः स्थानेऽन्यः कश्चिद्विकल्पो नानुभूयत इति निपातमहत्त्वं न तिरोधेयं स्यात्। केषाञ्चिन्निपातानां वाक्यादौ, वाक्यमध्ये, वाक्यान्ते च प्रयोगेण स्थितिभेदादर्थभेदोऽपि दृश्यते। तद्यथा समुच्चयार्थकस्यापि अपिशब्दस्यादौ प्रयोगेण प्रश्न इव प्रतीयते 'अपि भवान् वैयाकरणः?' तस्यैव पुनः 'भवानपि वैयाकरण' इतिरीत्या कथनेन अन्येऽपि सन्तीति प्रकाश्यते, तस्यैव चान्ते प्रयोगे 'भवान् वैयाकरणोऽपि' इत्येवमन्वये विषयान्तरविशेषज्ञतया सह व्याकरणज्ञतापि गम्यते। वाक्यस्य श्लोकस्य वा कस्मिन् भागे निपातोऽवतारणीय इति विवेकः प्रयोक्तुर्वैदग्ध्यं ख्यापयति। पद्येषु विषयेऽस्मिन् सविशेषमवधेयं भवति कवीनाम्। कदाचित्सम्पूर्णस्य वाक्यस्य भाव एकेन द्वाभ्यां वा निपाताभ्यां तत्संघातेन वा निर्भ्रान्तं प्रकाश्यते, 'इति चेन्मैवम्' इत्यादिषु।

'उच्चावचेष्वर्थेषु निपतन्तीति निपाताः'[6] इति यास्कवचनानुगुण्येन निपातानामर्थवत्त्वं सिद्ध्यति, किन्तु तदर्थवत्त्वं द्योत्यार्थमादाय एव स्वीक्रियते। द्योतकतासम्बन्धेनापि बोधकत्वमर्थवत्त्वमुरीक्रियते। व्याकरणशास्त्रे चादिनिपातानामुपसर्गनिपातानाञ्चार्थविषये पक्षत्रयं समालोच्यते। प्रकर्षादीनां धातुमात्रतो बोधाभावेनोपसर्गसम्बन्धात् तदर्थप्रतीतिरिति विशेषार्थद्योतकत्वं प्रतिष्ठते इत्यादौ धातोः गतिनिवृत्तिवाचकत्वं प्रशब्दस्य तु गतिवाचकत्वम्। अतः 'स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि'[7] वा इति प्रादिनिपातानां वाचकत्वमपि द्वितीयपक्षत्वेन स्वीक्रियते। धातूपसर्गौ सम्भूयार्थमाहतुः, अर्थाभिधाने सहकारिणः प्रादय इत्यपि तृतीयः पक्षः। त्रिष्वपि पक्षेषु प्रादिनिपातानां द्योतकत्वमेव समुचितम्। चादिनिपाताः केवलाः न प्रयुज्यन्ते अतोऽत्रापि द्योतकत्वपक्ष एव न्याय्यः। यदि वाचकाः स्युः, तदा गवादिवत् केवला अपि प्रयुज्येरन्। तदुक्तं वाक्यपदीये -

चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः।[8]

नागेशस्य भर्तृहरेश्चायमेवपक्ष इष्ट इति प्रतीयते। किन्तु भट्टोजिदीक्षितप्रभृतयः प्राचीनवैयाकरणास्तु निपातत्वावच्छिन्नानां सकलनिपातानां प्रादीनां चादीनाञ्च वाचकत्व-द्योतकत्वे स्वीकुर्वन्ति न तु नैयायिका इव प्रादीनां द्योतकत्वं चादीनां वाचकत्वमिति। भूषणसारे तु निपातानां द्योतकत्वपक्षं समर्थ्य निपातानां वाचकत्वमन्वयव्यतिरेकयोरित्यादिना वाचकत्वपक्षोऽपि समर्थितः। मञ्जूषायां नञ्निपातस्य इवनिपातस्य एवनिपातस्यार्थदृष्ट्या भूयान् विचार उपलभ्यते।

भगवता सूत्रकारेण 'प्राग्रीश्वरान्निपाताः'[9] इत्यत आरभ्य 'अधिरीश्वरे'[10] इति सूत्रमभिव्याप्य निपातानामधिकारः प्रोक्तः। 'चादयोऽसत्त्वे'[11] इत्यादिसूत्रेषु अद्रव्यार्थचादीनां निपातसंज्ञा कृता। प्रादेशं विलिखति अथ

शब्दानुशासनमित्यादौ क्रमशो विमानप्रारम्भक्रियाक्षेपकतयैव 'वि' 'अथ' इत्यनयोः दर्शनात् द्योतकत्वं क्रियाविशेषाक्षेपक-त्वमेवावगन्तव्यम्। जपमनुप्रावर्षत् इत्यादौ अनुप्रभृतेः द्योतकत्वं तु सम्बन्धपरिच्छेदक-त्वात्मकमेव यथा कर्मप्रवचनीयानाम्। चन्द्र इव मुखमित्यादौ इव शब्दस्य सादृश्यद्योतकता एव समुचिता। द्योतकत्वञ्च स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वम्। स्वद्योत्येनैव - अर्थेन निपाता अर्थवन्तो भवन्तीत्यादिविचारो व्याकरणशास्त्रे यत्र तत्र कृतो वर्तते। 'अनुर्लक्षणे'[12] इत्यादिसूत्रैः अनुप्रभृतीनां सूत्रकारेणैव द्योत्या अर्था उक्ताः।

निपातानां विपुलं क्षेत्रं वर्तते। भूयानर्थभेदोऽपि, अर्थावधारणमपि न तावत् सरलम्। तत्र तत्र शास्त्रेषु निरुक्तादौ च अर्थावधारणमपि दृश्यते। तथापि प्रचुरं विवेच्यं शिष्यते इति मन्यामहे। वैदिका निपाताः पौराणिका निपाताः साम्प्रतिकसंस्कृते प्रयुज्यमाना निपाता नार्थदृष्ट्या सर्वत्र साम्यं भजन्ते। कालानुरोधादर्थपरिवर्तनं दृश्यते इत्यपि कथं समजायत अयमपि विदुषां गवेषणीयो विषयः। रससिद्धानां महाकवीनां वाचि तात्पर्यानुकूलाः शब्दाः स्वयम् अहमहमिकया समवेताः भवन्ति। तत्र भाषायां तिङन्तकृदन्तनिपातादीनां यथायथं सुतरां प्रवाहो दृश्यते। आलङ्कारिकैः निपातादीनां प्रयोगसौष्ठवं भूम्ना समालोचितम्। काव्यप्रकाशे निपातानां रसाद्यनुगुणता वक्रोक्तिजीविते निपातवक्रता औचित्यविचारचर्चायां निपातप्रयोगौचित्यञ्च तत्तत्स्थलेषु विमृष्टम्। इत्थमेव क्वचित् निपातप्रयोगस्य रसानुकूलत्वं क्वचिच्च रसापकर्षकत्वमित्यादिरीत्या भावकैः काव्यसमीक्षायां तद्दोषगुणविवरणपद्धत्या विविच्यते।

निपातानां प्रयोगेन न केवलं वाक्यानामलङ्करणं भवति अपितु क्वचिदेषां प्रयोगं विना न विवक्षितार्थः सम्यक् प्रकाशते। 'अस्मिन् स्थाने आगच्छतु' इत्यस्य स्थाने 'इतस्तावदागम्यताम्' इति वाक्यं प्रयुज्य वक्ता साधुप्रयोगकारिणमात्मानं मनुते। क्वचित्तु एकोऽपि निपातप्रयोगः सम्पूर्णेऽपि पद्ये तथा रमणीयतां सञ्चारयति येन सर्वमपि सौष्ठवं तदायत्तमिव प्रतीयते। क्वचित्तु अभिप्रेतभावाभिव्यक्तये तत्प्रयोग एव साधुर्मन्यते, अन्यानि पदानि उपेक्ष्य। यथास्थानं प्रयुक्ता निपाताः सर्वविधमेवाभिप्रायं प्रकाशयितुं समर्था भवन्ति। क्वचिदेकस्य क्वचिद् द्वयोः क्वचित्त्रयाणां, क्वचिच्च तदावृत्त्या तत्प्रयोगो महाकविभिः कृतश्चमत्कारविशेषं जनयन्नभ्युपगम्यते। नैते निपाता निर्धारितेऽर्थ एव नियन्त्रिताः, अपितु कदाचित्तदतिरिच्यापि अर्थविशेषमभिव्यञ्जयन्ति। विविधानां मनोभावानामभिव्यक्तेः पृथक् पृथङ् निपाताः सन्ति, न च समान एव निपातः सर्वत्र युक्तो भवति प्रयुक्तः। निर्वेदो दैन्यं हर्षो विषाद औत्सुक्यम् उग्रता जुगुप्सा विस्मयः शोको वा भवतु, प्रतिभावं प्रकाममुपलभ्यन्ते भाषायां निपाताः। सादृश्यवाचकाः शब्दाः प्रायो निपाता एव सन्ति - यथा, इव, वत् इति।

आचार्यमम्मटेन चतुर्थोल्लासे व्यङ्ग्यस्य पदप्रकाश्यत्वं निरूपयता अधुनादि-पदद्योत्यवस्तुन उदाहरणमुखेन उल्लेखः कृत उपलभ्यते। तद्यथा -

सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः।
आश्चर्यं तव सौकुमार्यमभितः क्लान्ताऽसि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति ते नासितुम्।।[13]

अत्र वस्तुना कृतपरपुरुषपरिचया क्लान्तासीति वस्तु अधुनापदद्योत्यं व्यज्यते इति। यद्यपि तव सौकुमार्यमाश्चर्यं येनाधुना क्लान्तासि इति समुदायस्य व्यञ्जकत्वेऽपि अधुनैवायं क्लमो नान्यदा कदापि दृष्ट इति परपुरुषकृतनिद्रयोपभोगादेवेति गम्यते इति अधुनेति पदस्य प्राधान्यमिति भावः। एवमेव सखि नवनिधुवनसमरेऽङ्कपालीसख्या निविडया। हारो निवारित एवोच्छ्रियमाणस्ततः कथं रमितमिति प्राकृतश्लोकमाश्रित्य व्यतिरेकस्य कथंपदगम्यता प्रतिपादिता।[14] अत्र उपमानापेक्षया उपमेयस्य उत्कर्षरूपो व्यतिरेकालङ्कारो गम्यते कथंपदस्य विस्मयार्थत्वादिति तात्पर्यम्। यद्यपि विवरणकारैरत्र कथंपदेन जिज्ञासा अवगम्यते, जिज्ञासा च प्रसिद्धस्य नोदेतीति तद्विलक्षणैवेयं रतिर्जातेति जिज्ञासया व्यज्यते इति भाव इत्युक्तम्। 'रोदिषि सखि किमिति' इत्यत्र प्राकृतपद्येऽपि किमिति निपातद्वयेन हेत्वलङ्कारः प्रकाश्यते,[15] तेन च 'संकेतनिकेतनं गच्छन्तं दृष्ट्वा यदि तत्र गन्तुमिच्छसि तदा अपरं घटं गृहीत्वा गच्छेति वस्तु किमिति' निपातद्वयेन व्यज्यते।

इत्थमेव मम्मटेन 'पदैकदेशरचनावर्णेष्वपि रसादयः'[16] इति सूत्रमाध्यमेन नामादिभिरिव निपातैरपि रसादीनां प्रकाश्यता सङ्केतिता। 'कृतं च गर्वाभिमुखं मनस्त्वयेति' पद्यमुदाहृत्य चेति निपातस्य तुल्ययोगिताद्योतकत्वमुपन्यस्तम्। अत्र चकारेण मनोगर्वाभिमुखीकरणस्य अरिहननस्य च तुल्ययोगिता इति प्राचीनैः निरूपितम्। किन्तु अत्र तुल्ययोगितापदं समुच्चयपरमेव। अत्र चकाराभ्यां स्वसमभिव्याहृतक्रिययोस्तुल्यकालतारूपः समुच्चयालङ्कारो गम्यते, तेन च वीररसप्रकर्षो ध्वन्यते।[17] अयमेव मम्मटः षष्ठोल्लासे सुबन्तादीनां पदानां विशेषेण सन्निवेशं वाचामलङ्कृतिं मनुते, अयमेव सन्निवेशः सर्वनिर्माणसौष्ठवं सौशब्द्यमुच्यते। इदमप्यवधेयं यद् अविवक्षितार्थका चादयः पादपूरणमात्रप्रयोजना यदा भवन्ति तदा दोषत्वेनैव परिगण्यन्ते यतस्ते वृत्तन्यूनता परिहारायैव भवन्ति। किन्तु यदि वाक्यालङ्कारभूतं यमकादिनिर्वाहकं खल्वादिपदं प्रयुज्यते तदा तेषां न

दुष्टत्वम्। 'कला च सा कान्तिमतीति'[18] कालिदासपद्ये 'च' इति समुच्चयार्थक इति न दोषः, किन्तु 'उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि'[19] इति उदाहृते पद्ये 'हि' शब्दस्य निरर्थकत्वमेव। तत्प्रयोगं विनापि अन्वयबोधे निराकाङ्क्षता प्रतितिष्ठतीति कृत्वात्र दोषः। हेरत्र हेत्वर्थकता अवधारणार्थकता वा न साधयितुं शक्यते। निपातानां स्थापने युक्तः क्रमो न विद्यते, तदापि दोषः दोषत्वाच्च रसापकर्षः। यथोदाहृतं स्वयं मम्मटेन। 'त्वमस्य लोकस्य च नेत्रकौमुदी'त्यत्र [20] चकारस्य सन्निवेशः, त्वंशब्दानन्तरमेव युक्तः, त्वञ्चास्येति-रीत्या। अयं दोषः प्रायो निपातविषयक एव। यथा उपसर्गाणां धातोः पूर्वमेव प्रयोगो भवति तथैव एवेत्यादीनां व्यवच्छेद्यानन्तरं, पुनरादीनां व्यतिरेकादनन्तरम् इवादीनामुपमानादनन्तरं प्रयोगस्य युक्तता प्रतीयते।
रघुवंशस्य प्रथमसर्गे कालिदासेन 'उद्बाहुरिव वामनः'[21] इति प्रयुक्तम्, अत्राप्ययमेव दोषः। वामन इव उद्बाहुरित्यन्वयस्तत्र। चादीनामपि समुच्चेयादनन्तरमेव स्थापनमुचितम्। एवमेव 'अनेन प्रकारेण' इत्यर्थे निष्पन्नस्य इत्थमादेरपि यथायथं सन्निवेश एव रसोल्लासकः। प्रोच्येवेत्थमित्युदाहरणपद्ये[22] इत्थं प्रोच्येव इति वक्तुं युक्तम्, इत्थं शब्दस्याव्यवहित-पूर्वपरामर्शकत्वं प्रसिद्धमेव।
आनन्दवर्धनेनापि ध्वन्यालोकस्य तृतीयोद्योते अलक्ष्यक्रमव्यङ्ग्यस्य रसादिध्वनेर्-निरूपणावसरे अन्वयव्यतिरेकाभ्यां व्यञ्जकवर्गः समुच्चीयते। तत्र तेन सुबादीनामभिप्राय-विशेषव्यञ्जकत्वमुक्तम्। तद्यथा -

सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः।
कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्।। [23]

अत्र अनुक्तसमुच्चयार्थकस्य चकारस्य प्रयोगेण तेन निपातादीनामपि व्यञ्जकत्वं सूचितम्। यथोपन्यस्तं तेन स्वयमत्र - 'चशब्दान्निपातोपसर्गकालादिभिरपि प्रयुक्तैरभिव्यज्यमानो दृश्यते।' 'न्यक्कारो ह्ययमेवेति' पद्यमुदाहृत्य तेन तत्रापि, अप्यत्रैव, अहो, धिक् धिक् इत्यादीनां व्यञ्जकत्वमुक्तम्। अभिनवगुप्तेनापि स्वलोचने व्यापारितमत्र तद्यथा - "'तत्रापिशब्देन निपातसमुदायेनात्यन्तासम्भावनीयत्वम्। मत्कर्तृका यदि जीवनक्रिया तदा हननक्रिया तावदनुचिता, तस्यां च स कर्त्ता अपिशब्देन मनुष्यमात्रकम्।' 'धिग्धिगिति निपातस्य शक्रं जितवानित्याख्यायिकेयमिति उपपदसमासेन सहकृतः स्वर्गेत्यादिसमासस्य स्वपौरुषानुस्मरणं प्रति व्यञ्जकत्वम्।' 'वृथाशब्दस्य निपातस्य स्वात्मपौरुषनिन्दां प्रति व्यञ्जकता।'"[24] प्रत्येकमुदाहरणावसरे आनन्दवर्धनेन मूलग्रन्थे निपातव्यञ्जकत्वस्य उदाहरणद्वयं प्रस्तुतम्। अयमेकपदे तथेत्यत्र चशब्दस्य, मुहुरङ्गुलिसंवृताधरौष्ठमिति कालिदासीये पद्ये तुशब्दस्य च रसद्योतकत्वमुक्तम्। लोचनकारेण चात्राभिप्रायः सम्यक् समुल्लासितः -
'द्वौ चशब्दावेवमाहतुः काकतालीयन्यायेन गण्डस्योपरि स्फोट इतिवत्तद्वियोगश्च वर्षासमयश्च सममुपनतौ एतदलं प्राणहरणाय। अत एव रम्यपदेन सुतरामुद्दीपन-विभावत्वमुक्तम्।' 'न चुम्बितं तु' इत्यत्र तु शब्दव्यञ्जकत्वमाश्रित्य लोचनकार एवमुन्नयति - 'तुशब्दः पश्चात्तापसूचकः सन् तावन्मात्रचुम्बनलाभेनापि कृतकृत्यता स्यादिति ध्वनतीति भावः।' लोचनकारस्तु ध्वन्यालोकस्य 'निपातानां प्रसिद्धमपीह द्योतकत्वं रसापेक्षयोक्तमिति द्रष्टव्यम्' इति वचनमाश्रित्य वैयाकरणसिद्धान्तं स्पष्टं प्रतिपादयति - 'वैयाकरणादिगृहेषु हि प्राक्प्रयोगस्वातन्त्र्यप्रयोगाभावात् षष्ठ्याद्यश्रवणाल्लिङ्गसंख्याविरहाच्च वाचकवैलक्षण्येन द्योतका निपाता इत्युद्घोष्यत एवेति भावः।'[25]
द्वित्राणां निपातानामेकत्र पदे प्रयोगोऽपि न दोषाय, यदि रसव्यक्त्यनुगुणतया तत्प्रयोगः स्यात्। यथा चोदाहृतं तत्रैव आनन्दवर्धनेन– 'अहो बतासि स्पृहणीय वीर्यः' किञ्च 'हा धिक्कष्टमहो क्व यामि शरणमिति च।' लोचने सुष्ठु रसव्यञ्जकत्वमनयोः प्रकाशितम् - 'श्लाघातिशयो निर्वेदातिशयश्च अहो बतेति हा धिगिति च ध्वन्यते।'[26]
उपसर्गनिपातवक्रतानिरूपणाय उद्युक्तेन वक्रोक्तिजीवितकारेण पूर्वोक्तानि एव उदाहरणानि उपन्यस्य निपातवक्रता प्रकाशिता। तद्यथा -

रसादिद्योतनं यस्यामुपसर्गनिपातयोः।
वाक्यैकजीवितत्वेन सापरा पदवक्रता।। [27]

तेन 'वैदेही तु कथं भविष्यति हहा हा देवि धीरा भवे'त्युदाहरणमाश्रित्य स्वयं निपातपरम्पराजन्या वक्रता प्रस्तूयते -

'अत्र रघुपतेस्तत्कालज्वलितोद्दीपनविभावसंपत्समुल्लासितः सम्भ्रमो निश्चित-जनितजानकीविपत्तिसम्भावनस्तत्परित्राणकरणोत्साह कारणतां प्रतिपद्यमानस्तदेकाग्रतोल्लिखितसाक्षात्कारस्तदाकारतया विस्मृतविप्रकर्षः प्रत्यग्ररसपरिस्पन्दसुन्दरो निपात-परम्पराप्रतिपद्यमानवृत्तिर्वाक्यैकजीवितत्वेन प्रतिभासमानः कामपि वाक्यवक्रतां समुन्मीलयति। तदेव च पूर्वस्माद्विशेषाभिधायिनः तुशब्दस्य जीवितम्।'[28]

'अयमेकपदे तथा वियोगः' इति श्लोकमुपजीव्य वक्रोक्तिकारेणापि लेखनी व्यापरितैव एवम् - 'अत्र द्वयोः परस्परं सुदुःसहत्वोद्दीपनसामर्थ्यसमेतयोः प्रियाविरहवर्षा-कालयोस्तुल्यकालत्वप्रतिपादनपरं चशब्दद्वितयं

समसमयसमुल्लसितवह्निदाहदक्ष-दक्षिणवातव्यजनसमानतां समर्थयत् कामपि वाक्यवक्रतां समुद्दीपयति।' 'कथमप्युन्नमितं न चुम्बितं तु' इति पद्यगतनिपातवक्रतापि तेन समुन्नीता सुष्ठु - 'अत्र नायकस्य प्रथमाभिलाषविवशवृत्तेरनुभवस्मृतिसममुल्लिखिततत्काल समुचिततद्वदनेन्दुसौन्दर्यस्य पूर्व-परिचुम्बनस्खलितसमुद्दीपितपश्चात्तापदशावेशद्योतनपरः तुशब्दः कामपि वाक्यवक्रता-मुत्तेजयति।'[29]

आचार्यक्षेमेन्द्रेणापि औचित्यमहिमानमाविष्कृत्य निपातौचित्यं प्रस्तुतम्। चवाहवै-प्रभृतयो निपाताः प्रयुक्ता अर्थसंगत्या सन्देहराहित्यं प्रस्तुवन्ति। निपातौचित्यलक्षणन्तु स्वयं क्षेमेन्द्रेणोक्तम् -

उचितस्थानविन्यस्तैर्निपातैरर्थसंगतिः।
उपादेयैर्भवत्येव सचिवैरिव निश्चला॥[30]

'तस्मान्मोक्षसुखं समाश्रयत भोः सत्यं च नित्यं च यदिति' पद्ये प्रयुक्तचनिपातः शब्दसौष्ठवमतीव वर्धयति, निपातगतौचित्यस्य रमणीयः सन्निवेशोऽत्र दृश्यते। 'देवो जानाति सर्वं यदपि च तदपि ब्रूमहे' नीतिनिष्ठमितिपद्ये चकारस्य अनौचित्यमेव, 'पूर्वापरयो-रसम्बद्धत्वेन निरर्थक एव निरुपयोगश्चकारः प्रततोत्सवबहुजनभोजनपंक्तावपरिज्ञातः स्वयमिव मध्ये समुपविष्टः पश्चादभिषिक्तः परं लज्जार्द्रमना अनौचित्यं प्रतनोति।'[31]

व्यक्तिविवेककारोऽपि चादीनां निपातानां प्रयोगेन गम्यमानं सौष्ठवं कदोन्नीयते, कदा च नेति प्रकामं व्यचारयत् तद्यथा - 'चादीनां चोपाधीनां विशेष्येभ्यो निर्मलेभ्यः स्फटिकोपलेभ्य इव लाक्षादीनामव्यवधानमेव। तेन ते यदनन्तरमुपाधीयन्ते, तेष्वेव विशेषमाधातुमलं नान्यत्रेति यत्तेषां भिन्नक्रमतया क्वचिदुपादानं तदनुपपन्नमेव, अयथास्थानविनिवेशिनो हि तेऽर्थान्तरमनभिमतमेव स्वोपरागेणोपरञ्जयेयुः। ततश्च प्रस्तुतार्थस्यासामञ्जस्यप्रसङ्गः। कथञ्चिद् वाभिन्नक्रमतयाप्यभिमतार्थसम्बन्धोपकल्पने प्रस्तुतार्थप्रतीतेर्विघ्नितत्वात् तन्निबन्धने रसास्वादोऽपि विघ्नितः स्यात्, शब्ददोषाणा-मनौचित्योपगमात्तस्य च रसभङ्गहेतुत्वात्।'[32]

यथाहुः -

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा इति।।[33]

एवं भाषायां निपातानामवतरणमपेक्षानुगुणं स्वतो जायते किन्तु कुत्र तत्प्रयोगेण औचित्यं परिलसति, विद्वद्भिरवश्यमत्रावधेयं भवति। एवमत्र प्रकृतविषयमनुरुध्य शास्त्रप्रथितसरण्या सङ्क्षेपेण परिशील्य चानुरुन्धे पदान्तरविषयेऽपि दृष्टिनिक्षेपाय पादनिक्षेपं विधाय शास्त्राग्रेसृतिं सम्पादयन्तु सुधिय इति।

## सन्दर्भ


1. अभिज्ञानशाकुन्तलम् 1/10
2. पा. सू. 1/1/38
3. पा. सू. 1/1/44
4. पा. सू. 1/1/66
5. अनद्यतने लङ्। पा. सू. 3/2/111 इति सूत्रे महाभाष्ये प्रत्युदाहरणभाष्यम्।
6. निरुक्तम् 1/4
7. वाक्यपदीयम् 2/188
8. वाक्यपदीयम् 2/194
9. पा. सू. 1/4/56
10. पा. सू. 1/4/97
11. पा. सू. 1/4/57
12. पा. सू. 1/4/84
13. काव्यप्रकाशे उदाहरणम् 4/79
14. काव्यप्रकाशे उदाहरणम् 4/89
15. काव्यप्रकाशे उदाहरणम् 4/90
16. काव्यप्रकाशे कारिका 4/43
17. काव्यप्रकाशे उदाहरणम् 4/108
18. कुमारसम्भवम् 5/71, काव्यप्रकाशे उदारहणम् 7/186
19. काव्यप्रकाशे उदाहरणम् 7/147
20. कुमारसम्भवम् 5/71, काव्यप्रकाशे उदारहणम् 7/186
21. रघुवंशम् 1/3
22. काव्यप्रकाशे उदाहरणम् 7/254
23. ध्वन्यालोकः 3/16
24. ध्वन्यालोके लोचनटीकायाम् 3/16
25. ध्वन्यालोके लोचनटीकायाम् 3/16
26. ध्वन्यालोके लोचनटीकायाम् 3/16
27. वक्रोक्तिजीवितम् 2/33
28. वक्रोक्तिजीविते 2/33
29. वक्रोक्तिजीविते 2/33
30. औचित्यविचारचर्चा 25
31. औचित्यविचारचर्चायाम् 25 कारिकाव्याख्याने
32. व्यक्तिविवेके प्रथमे विमर्शे
33. व्यक्तिविवेके प्रथमविमर्शे वृत्तौ, ध्वन्यालोके तृतीयोद्योते 3/14 इत्यत्र वृत्तौ